# Argala Stotram

Sanskrit · Devanagari source script · Latin rendering available

अर्गलास्तोत्रम् ..
ॐ अस्य श्रीअर्गलास्तोत्रमन्त्रस्य विष्णुर्ऋषिः, अनुष्टुप् छन्दः,
श्रीमहालक्ष्मीर्देवता श्रीजगदम्बाप्रीतये सप्तशतीपाठाङ्गत्वेन जपे विनियोगः।
.. श्री..
श्रीचण्डिकाध्यानम्
ॐ बन्धूककुसुमाभासां पञ्चमुण्डाधिवासिनीम् .
स्फुरच्चन्द्रकलारत्नमुकुटां मुण्डमालिनीम् ..
त्रिनेत्रां रक्तवसनां पीनोन्नतघटस्तनीम् .
पुस्तकं चाक्षमालां च वरं चाभयकं क्रमात् ..
दधतीं संस्मरेन्नित्यमुत्तराम्नायमानिताम् .
अथवा
या चण्डी मधुकैटभादिदैत्यदलनी या माहिषोन्मूलिनी
या धूम्रेक्षणचण्डमुण्डमथनी या रक्तबीजाशनी .
शक्तिः शुम्भनिशुम्भदैत्यदलनी या सिद्धिदात्री परा
सा देवी नवकोटिमूर्तिसहिता मां पातु विश्वेश्वरी ..
अथ अर्गलास्तोत्रम्
ॐ नमश्चण्डिकायै
मार्कण्डेय उवाच .
ॐ जय त्वं देवि चामुण्डे जय भूतापहारिणि .
जय सर्वगते देवि कालरात्रि नमोऽस्तु ते .. १..

argalāstotram ..
oṃ asya śrīargalāstotramantrasya viṣṇurṛṣiḥ, anuṣṭup chandaḥ,
śrīmahālakṣmīrdevatā śrījagadambāprītaye saptaśatīpāṭhāṅgatvena jape viniyogaḥ|
.. śrī..
śrīcaṇḍikādhyānam
oṃ bandhūkakusumābhāsāṃ pañcamuṇḍādhivāsinīm .
sphuraccandrakalāratnamukuṭāṃ muṇḍamālinīm ..
trinetrāṃ raktavasanāṃ pīnonnataghaṭastanīm .
pustakaṃ cākṣamālāṃ ca varaṃ cābhayakaṃ kramāt ..

dadhatīṃ saṃsmarennityamuttarāmnāyamānitām .
athavā
yā caṇḍī madhukaiṭabhādidaityadalanī yā māhiṣonmūlinī
yā dhūmrekṣaṇacaṇḍamuṇḍamathanī yā raktabījāśanī .
śaktiḥ śumbhaniśumbhadaityadalanī yā siddhidātrī parā
sā devī navakoṭimūrtisahitā māṃ pātu viśveśvarī ..
atha argalāstotram
oṃ namaśvaṇḍikāyai
mārkaṇḍeya uvāca .
oṃ jaya tvaṃ devi cāmuṇḍe jaya bhūtāpahāriṇi .
jaya sarvagate devi kālarātri namo'stu te .. 1..

जयन्ती मङ्गला काली भद्रकाली कपालिनी .
दुर्गा शिवा क्षमा धात्री स्वाहा स्वधा नमोऽस्तु ते .. २..

jayantī maṅgalā kālī bhadrakālī kapālinī .
durgā śivā kṣamā dhātrī svāhā svadhā namo'stu te .. 2..

मधुकैटभविध्वंसि विधातृवरदे नमः .
रूपं देहि जयं देहि यशो देहि द्विषो जहि .. ३..

madhukaiṭabhavidhvaṃsi vidhātṛvarade namaḥ .
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi .. 3..

महिषासुरनिर्नाशि भक्तानां सुखदे नमः .
रूपं देहि जयं देहि यशो देहि द्विषो जहि .. ४..

mahiṣāsuranirnāśi bhaktānāṃ sukhade namaḥ .
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi .. 4..

धूम्रनेत्रवधे देवि धर्मकामार्थदायिनि .
रूपं देहि जयं देहि यशो देहि द्विषो जहि .. ५..

dhūmranetravadhe devi dharmakāmārthadāyini .
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi .. 5..

रक्तबीजवधे देवि चण्डमुण्डविनाशिनि .
रूपं देहि जयं देहि यशो देहि द्विषो जहि .. ६..

raktabījavadhe devi caṇḍamuṇḍavināśini .
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi .. 6..

निशुम्भशुम्भनिर्नाशि त्रिलोक्यशुभदे नमः .
रूपं देहि जयं देहि यशो देहि द्विषो जहि .. ७..

niśumbhaśumbhanirnāśi trilokyaśubhade namaḥ .
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi .. 7..

वन्दिताङ्घ्रियुगे देवि सर्वसौभाग्यदायिनि .
रूपं देहि जयं देहि यशो देहि द्विषो जहि .. ८..

vanditāṅghriyuge devi sarvasaubhāgyadāyini .
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi .. 8..

अचिन्त्यरूपचरिते सर्वशत्रुविनाशिनि .
रूपं देहि जयं देहि यशो देहि द्विषो जहि .. ९..

acintyarūpacarite sarvaśatruvināśini .
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi .. 9..

नतेभ्यः सर्वदा भक्त्या चापर्णे दुरितापहे .
रूपं देहि जयं देहि यशो देहि द्विषो जहि .. १०..

natebhyaḥ sarvadā bhaktyā cāparṇe duritāpahe .
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi .. 10..

स्तुवद्भ्यो भक्तिपूर्वं त्वां चण्डिके व्याधिनाशिनि .
रूपं देहि जयं देहि यशो देहि द्विषो जहि .. ११..

stuvadbhyo bhaktipūrvaṃ tvāṃ caṇḍike vyādhināśini .
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi .. 11..

चण्डिके सततं युद्धे जयन्ति पापनाशिनि .
रूपं देहि जयं देहि यशो देहि द्विषो जहि .. १२..

caṇḍike satataṃ yuddhe jayanti pāpanāśini .
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi .. 12..

देहि सौभाग्यमारोग्यं देहि देवि परं सुखम् .
रूपं देहि जयं देहि यशो देहि द्विषो जहि .. १३..

dehi saubhāgyamārogyaṃ dehi devi paraṃ sukham .
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi .. 13..

विधेहि देवि कल्याणं विधेहि विपुलां श्रियम् .
रूपं देहि जयं देहि यशो देहि द्विषो जहि .. १४..

vidhehi devi kalyāṇaṃ vidhehi vipulāṃ śriyam .
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi .. 14..

विधेहि द्विषतां नाशं विधेहि बलमुच्चकैः .
रूपं देहि जयं देहि यशो देहि द्विषो जहि .. १५..

vidhehi dviṣatāṃ nāśaṃ vidhehi balamuccakaiḥ .
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi .. 15..

सुरासुरशिरोरत्ननिघृष्टचरणेऽम्बिके .
रूपं देहि जयं देहि यशो देहि द्विषो जहि .. १६..

surāsuraśiroratnanighṛṣṭacaraṇe'mbike .
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi .. 16..

विद्यावन्तं यशस्वन्तं लक्ष्मीवन्तञ्च मां कुरु .
रूपं देहि जयं देहि यशो देहि द्विषो जहि .. १७..

vidyāvantaṃ yaśasvantaṃ lakṣmīvantañca māṃ kuru .
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi .. 17..

देवि प्रचण्डदोर्दण्डदैत्यदर्पनिषूदिनि .
रूपं देहि जयं देहि यशो देहि द्विषो जहि .. १८..

devi pracaṇḍadordaṇḍadaityadarpaniṣūdini .
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi .. 18..

प्रचण्डदैत्यदर्पघ्ने चण्डिके प्रणताय मे .
रूपं देहि जयं देहि यशो देहि द्विषो जहि .. १९..

pracaṇḍadaityadarpaghne caṇḍike praṇatāya me .
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi .. 19..

चतुर्भुजे चतुर्वक्त्रसंसुते परमेश्वरि .
रूपं देहि जयं देहि यशो देहि द्विषो जहि .. २०..

caturbhuje caturvaktrasaṃsute parameśvari .
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi .. 20..

Part 2 · blocks 21–28

कृष्णेन संस्तुते देवि शश्वद्भक्त्या सदाम्बिके .
रूपं देहि जयं देहि यशो देहि द्विषो जहि .. २१..

kṛṣṇena saṃstute devi śaśvadbhaktyā sadāmbike .
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi .. 21..

हिमाचलसुतानाथसंस्तुते परमेश्वरि .
रूपं देहि जयं देहि यशो देहि द्विषो जहि .. २२..

himācalasutānāthasaṃstute parameśvari .
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi .. 22..

इन्द्राणीपतिसद्भावपूजिते परमेश्वरि .
रूपं देहि जयं देहि यशो देहि द्विषो जहि .. २३..

indrāṇīpatisadbhāvapūjite parameśvari .
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi .. 23..

देवि भक्तजनोद्दामदत्तानन्दोदयेऽम्बिके .
रूपं देहि जयं देहि यशो देहि द्विषो जहि .. २४..

devi bhaktajanoddāmadattānandodaye'mbike .
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi .. 24..

भार्यां मनोरमां देहि मनोवृत्तानुसारिणीम् .
रूपं देहि जयं देहि यशो देहि द्विषो जहि .. २५..

bhāryāṃ manoramāṃ dehi manovṛttānusāriṇīm .
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi .. 25..

तारिणि दुर्गसंसारसागरस्याचलोद्भवे .
रूपं देहि जयं देहि यशो देहि द्विषो जहि .. २६..

tāriṇi durgasaṃsārasāgarasyācalodbhave .
rūpaṃ dehi jayaṃ dehi yaśo dehi dviṣo jahi .. 26..

इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः .
सप्तशतीं समाराध्य वरमाप्नोति दुर्लभम् .. २७..

idaṃ stotraṃ paṭhitvā tu mahāstotraṃ paṭhennaraḥ .
saptaśatīṃ samārādhya varamāpnoti durlabham .. 27..

.. इति श्रीमार्कण्डेयपुराणे अर्गलास्तोत्रं समाप्तम् ..

.. iti śrīmārkaṇḍeyapurāṇe argalāstotraṃ samāptam ..

---

## Source & edition

Complete selected Sanskrit Wikisource poem block; source opening/closing lines and spellings are preserved. Segment grouping is added for reading. No English meaning is supplied for this edition.

Sanskrit Wikisource contributors (transcription); classical composition attribution recorded separately. अर्गलास्तोत्रम्, revision 305095. CC BY-SA 4.0.

The source spellings are retained. Reading blocks and the Latin rendering help you follow the text; these adaptations are also CC BY-SA4.0.

Edition ws-305095-76d7ee37bd.